कल्प्यते हस्तगृहीता इति चेत्’। तन्न, अयथार्थस्यापि उच्चारणं सम्भवत्येव यतः, यथा, ‘दश दाड़िमानि षड़-पूपाः’ इति। यस्यापि च एष पक्षो, विग्रहवान् इन्द्रः इति, तस्यापि इन्द्रशब्देन आमन्त्रणं सम्बोधनार्थं, सम्बोधनम् अनुवचनाय, तत्र सम्बुद्धः इत्यवगते अनुवचनं न्याय्यम्, न च, असौ केनचित् प्रकारेण सम्बुद्ध इति अवगम्यते, अनवगते सम्बोधनं व्यर्थम्। ‘वचनप्रामाण्यात् सम्बुध्यते इत्येवं गम्यते इति चेत् उक्तम् अदृष्टकल्पनायां हस्तादिकल्पनानुपपत्तिरिति। न च, असौ सम्बुद्धः इति अवधार्य्यते, प्रमाणाभावात्। तस्मात् सम्बोधनवचनं न सम्बोधनाय, निर्द्देशार्थमेव। अविग्रहपक्षेऽपि तत् निर्द्देशार्थमेव भविष्यति। तत्र आमन्त्रितविभक्तिवचनं स्तुतये, एवम् इदं देवतात्वं साधयितृतमं, यच्चेतनादिवत् सम्बुध्य साधयति इति चेतनवदिव उपचर्य्यमाणः सम्बुद्धिशब्देन आमन्त्र्यते, तथा सम्बोधनशब्देन निर्द्दिश्य उच्यते, गृहीतवन्तो वयं तव हस्तं त्वदाश्रया वयम् इत्यर्थः, अस्माभिः इन्द्रकर्म्म कर्त्तव्यम् इत्येतत् अनेन स्मार्य्यते। तथा “इमे द्यावापृथिव्यौ इते अपारे यत् संगृह्णासि मघवन्नहो ते पूजितो मुष्टिः,” इति मन्त्रमिव मुष्टिं स्तुत्यर्थेन वदति,। तस्यापि भावे न प्रमाणमस्ति, न इदं वचनं, “इत् महान् काशिः” अस्ति, किन्तर्हि, यस्तव काशिः, स महान् इति, अन्यार्थस्तत्र काशिरस्ति इति, अन्यः तव काशिर्महान् इति। “सता हि स्तुतिः उपपद्यते इति चेत्”। नैतत्, नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः, पौरुषविधिकैरङ्गैः तस्यापि स्तुतिर्भवति, यथा “एते वदन्ति शतवत् सहस्रवत् अभिक्रन्दन्ति हरितेभिरासभिः। विष्टी ग्रावाणः सुकृतः, सुकृत्यया होतुश्चित् पूर्व्वे हविरद्यमाशत” इति। तथा, “सुखं रथं युयुते सिन्धुरश्विनम्” इति। तस्मात् न स्तुतिवचनात् अर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः। तथा, “तुविग्रीव इन्द्रः, इति नैतत् युक्तं भवति, ग्रीवावान् इन्द्रः इति, किन्तर्हि याऽस्य ग्रीवा, सा महती, ग्रीवासत्त्वे नास्ति प्रमाणम्। न च, ग्रीवास्तुतिः अर्थापत्तिः, अपुरुषविधेऽपि स्तुत्युपपत्तेः। अपि च, “इन्द्रो वृत्राणि जिघ्नते” इत्येताभ्यां पदाभ्याम् इन्द्रशब्दः सम्बद्धो न शक्नोति तुविग्रीवादिभिः सम्बन्धं यातु, द्विरुच्चारणम् अस्य प्रसज्यते, तुविग्रीवावान् इन्द्रो वेदितव्यः वृत्राणि च इन्द्रो हन्ति—इति, तथा हि सति भिद्येत, अभिन्नं च वाक्यम् उपलभ्यते, तदेवम् अवकल्पते, यदि तुविग्रीवादयोऽस्य न उपदिश्यन्ते—इति स्तुत्यर्थं सङ्कीर्त्त्यन्ते तुविग्रीवादिः, ‘अस्य सोमदे ईदृशो वृत्राणि हन्ति’—इति एषा तु वचनव्यक्तिः, वृत्रबधोपदेशपरम् इदं वचनम्—इति। यदपि वचनं,—बाहू ते इन्द्र रोमशौ, अक्षी ते इन्द्र पिङ्गले’—इति, तदपि बाह्वोः रोमशत्वम् अक्ष्णोश्च पैङ्गल्यम् आह, न बाहुसत्तामक्षिसत्तां च। यदपि अक्षिसत्तां वदति—इति गम्यते,—‘चक्षुष्मते शृण्वते ते ब्रवीमि’—इति, तदपि न चक्षुःसम्बन्धार्थं, चक्षुष्मते ब्रवीमि—इति वचनसम्बन्धार्थं, तत् सतीमिव चक्षुष्मत्तां स्तुत्यर्थम् उच्चारयति। कुतः एतत् अवगम्यते?। चतुर्थीनिर्द्देशात्, यदि प्रातिपदिकार्थाऽध्यवसीयते, तथा वाक्यम्भिद्येत, चक्षुष्मान्—इत्येवं च उद्दिश्येत, चक्षुष्मते ते ब्रवीमि—इति च। तस्मात् न किञ्चित् अन्यार्थदर्शनं पुरुषविधतां देवतायाम् इदं ख्यापयति—इति, न च, इदं भोजनं, न हि देवता भुङ्क्ते, तस्मात्, भोजनस्य तदर्थत्वात्—इति तत् असद्वचनम्। यदपि स्मृत्युपचारान्यार्थदर्शनैर्भुङ्क्ते—इति, तत् अविग्रहत्वेन प्रत्युक्तम्। अपि च, भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत। न च, मधुकरीवत् अन्नरसभोजिन्यो देवताः—इति प्रमाणमस्ति, मधुकरीषु प्रत्यक्षं, न च तद्वत् देवतायाम्। तस्मात् न भुङ्क्ते देवता इति। यदुक्तम् देवतायै हविः प्रत्तं नीरसं भवति—इति। नैषदोषः, वातोपहतं नीरसम्भवति—इति, शीतीभूतं च। न च, असौ कस्यचित् अर्थस्य ईष्टे, अनीशा कथं दास्यति?।—इति। यदुक्तं, स्मृत्युपचारान्यार्थदर्शनैः ईशाना देवता-इत्यवगम्यते—इति। तन्न, स्मृतेः मन्त्रार्थवादमूलत्वात्—इत्युक्तम्, उपचारोऽपि,—‘देवग्रामो देवक्षेत्रम्’—इति उपचारमात्रम्,—यो यदभिप्रेतं विनियोगमर्हति, तत्तस्य स्वं, न च ग्रामं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता। तस्मात् न सम्प्रयच्छति—इति, देवपरिचारकाणान्तु ततो भूतिर्भवति, देवताम् उद्दिश्य, यत् त्यक्तम्। यदुक्तम्, अन्यार्थदर्शनम् ईशानां देवतां ख्यापयति,—‘इन्द्रो दिव इन्द्र ईशे’—इत्येवमादीति, तत् प्रत्यक्षाम् अनीशानां देवताम् उपलभ्य अध्यवस्यामः,—भाक्त एष शब्दः—इति। ‘तत्र आह,+—वचनप्रामाण्यादेव अस्य ईशानता अवगम्यते, यद्देवलोका अर्थान् विनियुङ्क्ते, तद्देवताभिप्रायादेव-इत्यध्यवस्यामः’—इति। तत्र,